# संस्कृत-वार्ता:

**दिनाङ्क :-25.06.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### लोकसभा-शपथग्रहणम्

अष्टादशम्या: लोकसभाया: प्रथमसत्रं ह्य: नवनिर्वाचितानां सांसदानां शपथग्रहणेन सह समारब्धम्। प्रधानमन्त्री नरेन्द्रमोदी य: लोकसभासदनस्यनेतास्ति सदनस्य सदस्यत्वेन शपथग्रहणनेतृषु प्रथमो वर्तते। अस्थायि-लोकसभाया: अध्यक्ष: भर्तृहरि-महताब: श्रीमोदिने शपथवचनं प्रदत्तवान् तदनु अध्यक्षपदनिर्वाचनं यावत् लोकसभाया: कार्याचरणे श्रीमहताबस्य सहायतायै नियुक्ता: अध्यक्षसमूहा: शपथवचनं कारितवन्त:। भारतीयजनतापार्टीतिदलस्य सांसदौ राधामोहनसिंह:, फग्गनसिंहकुलस्ते लोकसभाध्यक्षविशिष्टसमूहस्य सदस्यत्वेन शपथं स्वीकृतवन्तौ। ध्येयं वर्तते यत् कांग्रेससांसद: के.सुरेश:, डी.एम. के. सांसद: टी.आर.बालु:, टी.एम.सी. दलस्य च सुदीप-बद्योपाध्याय: लोकसभाध्यक्षाय संघटितानां समूह सदस्यानां रूपेण शपथग्रहणकार्याचरणं नैव निभालितवन्त:। तदनन्तरं केन्द्रीयमन्त्रीण: राजनाथसिंह:, अमितशाह:, नीतिनगडकरी, शिवराजसिंहचौहान:, मनोहरलाल:, पीयूषगोयल:, जितनराममांझी, राजीवरञ्जन:, डॉ.वीरेन्द्रकुमार:, किरेन-रिजिजू:, चिरागपासवान:, ज्योतिरादित्यसिंधिया:, अन्नपूर्णादेवी अन्ये च लोकसभासदस्या: शपथवचनं स्वीकृतवन्त:। शपथग्रहणसमारोहे अनेके नेतार: प्रादेशिक-भाषास्वपि शपथग्रहणं स्वीकृतवन्त:। केन्द्रीयमन्त्रिणौ एच.डी.कुमारस्वमि प्रह्लादजोशी च कन्नडभाषायां तत्रैव, धर्मेन्द्रप्रधान:, जुएल ओराम: उडियाभाषायां अपि च केन्द्रीय मन्त्री सर्बानन्दसोनोवाल, असमियाभाषायां केन्द्रीयमन्त्रिणौ च राममोहननायडू: जी. किशन. रेड्डी च तेलुगुभाषायां शपथवचनं गृहीतवन्त:। केन्द्रीयमन्त्रिण: सी.आर् पाटिल: गुजराती भाषायां प्रतापरावजाधव: मराठीभाषायां डॉ. जितेन्द्रसिंह: च डोगरीभाषायां शपथं स्वीकृतवन्त:। केन्द्रीयमन्त्री दुर्गादास उइके: संस्कृतभाषायां शपथवचनं गृहीतवान्।

### प्रधानमन्त्री-संसदसत्रम्

प्रधानमन्त्रिणा श्रीमोदिना वार्ताहरान् सम्बोधयता प्रोक्तं यत् अष्टादश-लोकसभाया: सत्रमिदं विकसित भारतस्य निर्माण-संकल्पेन सह समारप्स्यते तेन सबलं प्रतिपादितं यत् तेषां सर्वकारेण देशस्य सेवायै सहैव जनानां आकांक्षा: च पूरयितुं अनवरतं प्रयासा: विधास्यन्ते। श्रीमोदिना प्रोक्तं यत् सर्वकारस्य प्रचालनार्थं बहुमतस्य आवश्यकता भवति परं देशस्य सञ्चालनार्थं सामान्य-सहमते: आवश्यकता भवति। तेन प्रोक्तं यत् विश्वस्य बृहत्तम-मतदानं भव्यतया सुसम्पन्नम्। प्रधानमन्त्रिणा कथितं यत् स्वतन्त्रताया: परं द्वितीयवारं देशस्य जनै: कस्मैश्चित् सर्वकाराय अनवरतं तृतीयवारं सेवाया: अवसरो प्रदत्त:। प्रधानमन्त्रिणा विश्वास: प्रकटित: यत् अष्टादश-लोकसभाया: सांसदा: सामान्यजनानां आकांक्षा: पूरयितुं सम्यक् प्रयासान् विधास्यन्ति।

### राष्ट्रपति रात्रिभोज:

राष्ट्रपति पदासीनया द्रौपदी मुर्मू वर्यया ह्यः राष्ट्रपतिभवने प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रीयमन्त्रिपरिषदः सम्माने रात्रिभोजस्य आयोजनं कृतवती। ततः पूर्वं सूचनाप्रसारणसंसदीयकार्याणां च राज्यमन्त्री एल मुरुगनः राष्ट्रपतिभवने राष्ट्रपतिमुर्मू वर्यया सह मेलनं कृतवान्।

### नड्डा/राज्यसभा

ह्यः राज्यसभायां केन्द्रीयमन्त्री जेपी नड्डा सदनस्य नेता नियुक्तः। सः पीयूषगोयलस्य पदम् अलङ्करिष्यति, यः अधुना महाराष्ट्रस्य उत्तरमुम्बईतः लोकसभायाः सदस्यः अस्ति। अस्मिन् वर्षे फरवरीमासे गुजराततः भाजपेति दलेन राज्यसभायां नड्डामहोदयाय नामाङ्कितः आसीत्।

### जे.पी. नड्डा

केन्द्रीयस्वास्थ्यपरिवारकल्याणमन्त्रिणा जगतप्रकाशनड्डा इत्यनेन ह्यः नवदिल्ल्यां आयोजिते एकस्मिन् कार्यक्रमे चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य राष्ट्रिय-अतिसार-विमोचन-अभियानस्य शुभारम्भो विहितः। तेन स्वास्थ्यराज्यमन्त्री अनुप्रिया पटेलस्य प्रताप राव जाधवस्य च उपस्थितौ बालकानां कृते ओरल रिहाइड्रेशन सॉल्ट (ORS) इति औषधेः वितरणं कृत्वा

अभियानस्य आरम्भः कृतः। मासद्वयात्मकं अभियानं जुलैमासस्य प्रथमदिनात् आरभ्य अगस्तमासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं चलिष्यति।

**<u>क्रिकेट्</u>**

गतरात्रौ आई.सी.सी. विंशति प्रति विंशतिः विश्वचषकक्रिकेट् उत्कृष्ट-अष्ट-चक्रीय प्रतिस्पर्धायां डैरेन सैमी अन्ताराष्ट्रिय क्रिकेट-क्रीडाङ्गणे भारतदलेन-आस्ट्रेलियादलं चतुर्विंशति: धावनांकै: पराजितम्।

**।।इति वार्ता:।।**